Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 6 | ISSN : 2581- 6306

# वैयाकरणभूषणसार धात्वर्थ व्याकरणस्यश्च विवेचनम्

डॉ. छगन लाल महोलिया
सह आचार्य – संस्कृत, श्री रतनलाल कंवर लाल पाटनी, राजकीय स्नातकोत्तर महाविद्यालय, किशनगढ़, अजमेर।

**Article Info**
Volume 3, Issue 6
Page Number : 142-154
**Publication Issue :**
November-December-2020
**Article History**
Accepted : 10 Nov 2020
Published : 24 Nov 2020

**शोधसारांशः-** कौण्डभट्टकृतवैयाकरणभूषणसारस्य वैशिष्ट्यमद्यापि पूर्ववदवतिष्ठते। अत एवायं ग्रन्थो विभिन्नेषु विश्वविद्यालयेषु पाठ्यक्रमे निर्धारितो विद्यते। प्रायः सर्वत्र व्याकरणदर्शनग्रन्थाध्ययनाऽध्यापने वैयाकरणभूषणसारस्यैव प्राधान्यमवलोक्यते। व्याकरणशास्त्रे वैयाकरण भूषणसारग्रन्थस्यातीव महत्त्वमस्तीति नातिरोहितम्। ग्रन्थोऽयं धात्वर्थादि विचारपरकः। यद्यपि धात्वर्थादिविचारोऽन्यमतनिरसनपुरस्सरं सम्यक्तया विहितोऽन्याचार्यैरिति। परं कौण्डभट्टेन यादृग् विचारो भूषणसारे कृतः न ताट्ट ग्दृश्यते अन्यत्र महाभाष्यसागरोद्भट्टोजिदीक्षित - कृतशब्दकौस्तुभनिर्णीतार्थ प्रकाशकत्वात्।
**मुख्यशब्दाः–** वैयाकरणभूषणसारः, कौण्डभट्टः, दर्शनः, धात्वर्थ, भाषा।

**व्याकरणस्य महत्त्वम्** भाषाज्ञानाय व्याकरणस्य ज्ञानमत्यधिकमावश्यकं भवति। व्याकरणं भाषाप्रवाहं नियन्त्र्यति एवं तत्र जातदोषं समाधाय भाषायाः शुद्धं परिष्कृतं रूपं च दर्शयति। भाषा जगति निखिल व्यवहारभूता विद्यते। यदि भाषा न स्यात् तर्हि जगदिदमन्धे तमसि मज्जेत। यथोक्तं दण्डिना -

"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥[1] इति।

नामरूपात्मकं जगदेव शब्दब्रह्म तदेव स्फोटरूपं विद्यते। अतः शब्दस्य महनीयतां प्रकटयन् महावैयाकरणो भर्तृहरिराह -

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[2] इति।

यथा अनादिनिधनं शब्दब्रह्मैव परावाग्रूपं पदार्थरूपेण जायते तथा च वाचकाभिधाननाम शब्दैः च व्याख्यायते। अभिधेयाभिधानात्मकः प्रपञ्चोत्पादना नुकूलशक्त्यवच्छिन्नैव शब्दः। एवं विलक्षणशब्दस्य यथार्थावबोधनं व्याकरणरू पोपायान्तरेण विना असाध्यमुपपद्यते। यथोक्तं भर्तृहरिणा -

"अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥[3] इति।

यद्यपि नित्यस्य ब्रह्मात्मकस्य शब्दस्य व्याक्रिया व्याकरणात् पराऽस्ति तथापि रेखागवयन्यायेन "असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इति अभियुक्तो क्तेराधारेण व्याकरणशब्दस्य व्याक्रिया क्रियते। अनेन व्याकरणशास्त्रं शब्दस्य व्युत्पादनेन सर्वशास्त्रोपकारकं गृह्यते। उक्तमपि-"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् इति।

जना भाषां विना नैजमाशयं प्रकाशयितुं न प्रभवेयुः। आशयं च अप्रकाश यन्तस्ते किमपि कर्तुं कथं समर्था भवेयुः, तदभावे तेषां कृते जगदिदमन्धकारमयं स्यात्। साधुशब्दा हि प्रयुक्ता यथार्थमर्थ प्रकटयन्ति। विशुद्धं भाषायाः परिमार्जितञ्च स्वरूपं व्याकरणादेव जायते। उक्तञ्च महाभाष्ये उद्योत टीकायाम् -

"सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ॥[4] इति।

शब्दव्युत्पादकं शास्त्रं व्याकरणमुच्यते। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणमित्यस्य व्युत्पत्तिः। "पृषोदरादीनि यथोपदिष्टं" "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रयता पाणिनिना, "सिद्धे शब्दार्थसम्बन्धे" इत्युक्तवता वार्तिककारेण "सिद्धः शब्दः, अर्थः सम्बन्धश्च" इति प्रातिपादयता महाभाष्यकारेण च शब्दार्थसम्बन्धस्य नित्यत्वं व्यवस्थापितम्। भर्तृहरिणाऽपि वाक्यपदीयस्य ब्रह्मकाण्डे लिखितं यत् -

"नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।

सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥[5] इति।

एवं शब्दार्थसम्बन्धस्य नित्यत्वात् तद्रक्षणाय च व्याकरणशास्त्रमाव श्यकम्। प्रायः सर्वैरेव वेदस्य शाश्वतत्वं नित्यत्वमपौरुषेयत्वञ्च अङ्गीक्रियते। सर्वस्मिन् कल्पे ब्रह्मणा ऋषिभ्यो वेदः समुपादिश्यत। वेदात् लौकिकी भाषा विस्तृता। एवं वैदिकलौकिकशब्दानामनुशासनाय व्याकरणशास्त्रमपेक्षितं वर्तते। एतदेव सूचितं महाभाष्यकारेण। तदुक्तं महाभाष्ये- अथ शब्दानुशासनमिति। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति। अनुशिष्यन्ते पृथक् क्रियन्ते असाधुशब्देभ्यः साधुशब्दा येन तदनुशासनम् । शब्दानामनुशासनं शब्दानुशासनमिति व्याकरणस्य नामान्तरमेव। केषां शब्दानां ? लौकिकानां वैदिकानाञ्चेति। वेदात् सर्वाः प्रवृत्तयः जायन्ते, इति भगवता व्यासेनेत्थं प्रतिपादितम् -

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृतयः॥[6] इति।

अपरञ्चापि मनुना लिखितम् -

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।

वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥[7] इति।

तात्पर्यमिदं यद् आदौ ब्रह्मा सर्वेषां नामानि, अर्थाः, कर्माणि, इत्येवमादीनि वेदशब्देभ्य एव नियतं कृतवान्। श्लोकस्थसंस्थापदेन शब्दस्य रचनाविशेषो बोध्यते। रचनाविशेषश्च प्रकृतिप्रत्ययविभागः, प्रकृत्यर्थप्रत्ययार्थविभागः सम्बन्ध श्चास्ति । एतेन वेदो व्याकरणस्य प्रयोजक इति स्पष्टमेव ।

व्याकरणशास्त्रविदा एव वेदानां सम्यक्तया उच्चारणं कर्तुं शक्यते तदुक्तं महाभाष्ये "रक्षोहामगलघवसन्देहाः प्रयोजनम् वेदानां रक्षायै व्याकरण स्याध्ययनमावश्यकम्। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इतिभाष्यवचनात् वेदाङ्गसहितं वेदाध्ययनं ब्राह्मणस्य नित्यकर्म वर्तते तत् षडङ्गेषु व्याकरणस्य मुख्यं स्थानं विद्यते। "मुखं व्याकरणं स्मृतम् इति भाष्योक्तेः । मुखमिव प्राधान्यात् मुख्यमेतत् शास्त्रं, यथा- प्राणिनामङ्गेषु मुखस्य प्राधान्यं विद्यते तथैव शिक्षा-निरुक्त-कल्प- ज्योतिष-छन्दो-व्याकरणेषु षडङ्गेषु व्याकरणस्य मुख्यं स्थानं विद्यते तदुक्तं शिक्षायाम् -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥[8] इति।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयेते॥[9] इति।

नहि विना व्याकरणं वेदस्वरूपस्यान्यूनानतिरिक्ततया संरक्षणम् पदपदा र्थावगमद्वारा वेदोक्तैतिहासिकपारलौकिकसकलनिःश्रेयससाधनधर्मानुष्ठानं सम्भवि तुम् अर्हति" इति व्याकरणं हि वेद पुरुषस्य मुखं स्मृतम्। षट्सु वेदाङ्गेषु प्रधान्येनावस्थितं हि व्याकरणं न केवलं वेदपुरुषस्य मुखमात्रेण सर्वातिशायि अपितु इतरशास्त्रमूलकत्वात् तस्यप्राधान्यं वर्तते। "साधुशब्दोपदेशशब्दानुशासनम्" इति व्याकरणशासनप्रस्तावे पदमञ्जरी कारा हरदत्तमिश्रा अप्यवोचन -

"उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।

प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ॥

"रूपान्तरेण ते देवा विचरन्ति महीतले।

ये व्याकरणसंस्कारपवित्रतमुखा नराः ॥[10] इति।

चिकित्साऽध्यात्मादिशास्त्रवद् व्याकरणशास्त्रमपि भाषामलशोधकत्वेन उपकार कमिति । समर्थितं भर्तृहरिणा -

"कायाग्निबुद्धिविषया ये मलाः समवस्थिताः ।
चिकित्सा लक्षणाध्यात्मशास्त्रस्तेषां विशुद्धयः॥[11] इति ।

व्याकरणस्य प्रथमवेदाङ्गत्वं भर्तृहरिणाऽपि प्रतिपादितम् -

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गं प्राहुळकरणं बुधाः॥[12] इति।

तात्पर्यमिदं यत् वेदार्थज्ञानं निरुक्तेन, छन्दोज्ञानं छन्दःशास्त्रेण वर्णोच्चारणं शिक्षया, कर्मणां प्रयोगज्ञानं कल्पेन, तिथिनक्षत्रादिज्ञानं ज्योतिः शास्त्रेण भवितुमर्हति। किन्तु वेदस्य शब्दराशित्वात् तत्स्वरूपज्ञानात् पूर्वमुपर्युक्तानां नोपयोगः। वेदस्वरूपज्ञानञ्च व्याकरणेनैव भवति। व्याकरणातिरिक्तोऽन्योपायो नास्ति, येन लाघवेन शब्दज्ञानं भवितुं शक्यते। एतदेव समर्थयता पतञ्जलिना विलिखितं यत् 'लघ्वर्थ चाध्येयं व्याकरणम् । ब्राह्मणेनावश्यं शब्दाः ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्।[13] तत्रैव पुनस्तेन प्रतिपादितम् यत् "किं शब्दोपदेशः, अपशब्दोपदेश उभयोपदेशो वा शब्दानुशासनाय कर्तव्यः । झटित्येव तेन समाहितं यत् इष्टसिद्धयनुरोधेन लाघवाच्च शब्दोपदेश एव कर्तव्यः । परं शब्दानां प्रतिपदोपदेशो भवितुं न शक्यते। यतोहि अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। अद्यत्वे पुनर्यदि मानवः यःसर्वथा चिरञ्जीवति परमायुर्भवति तदा स वर्षशतं जीवति इति। अतः न चान्तरेण व्याकरणं लघुनोपायेन शब्दा ज्ञातुं शक्या। स च लघूपायः किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दोघान् प्रतिपद्येरन् इति।

अतः किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यमिति व्याकरणस्य प्रक्रिया महाभाष्यकारेण सिद्धान्तिता। एतेन सिद्धं यत् लाघवेन शब्दोपदेशो व्याकरणेनैव संभवति । मतमिदं भर्तृहरिणाऽपि समर्थितं तेनोक्तं यत्-

"प्राप्तरूपविभागाया यो वाचः, परमो रसः।
यत्तत् पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥[14] इति ।

शब्दानां तत्त्वाववोधो व्याकरणं विना भवितुं नार्हति। इदं व्याकरणमपर्गस्य द्वारम् वाङ्गलानां चिकित्सितम् सर्वविद्यानां पवित्रञ्चास्ति। सर्वासु विद्यासु इदमेव प्रकाशते। तथा हि विलिखितं वाक्यपदीये -

तदद्वारमपवर्गस्य वाङ्गलानां चिकित्सितम्।
माना किमतमा पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥[15] इति ।

किं बहुना- इदं व्याकरणागमं प्राप्य परं ब्रह्माधिगम्यते। श्रुतिरपि प्रतिपादयति-एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्ग लोके कामधुग भवति इति वचनानुसारम् ऐहलौकिकसुखप्रदातृ इदं व्याकरणशास्त्रं साधुशब्दप्रयोगेण पुण्यं, पुण्येन सुखप्राप्तिः स्वर्गप्राप्तिश्चेति क्रमः। किञ्च साधुशब्दप्रयोगेण अन्तःकरणं निर्मलं, निर्मले अन्तःकरणे ईश्वरचिन्तनम् ईश्वरचिन्तनेन मोक्षप्राप्तिः इत्थं मोक्षप्राप्तये एतत् सोपानभूतं शास्त्रम् अतः व्याकरणस्य परमं प्रयोजनं मोक्षप्राप्तिरूपञ्चास्ति। अत्र प्रमाणम् "चत्वारि शृङ्गा त्रयो अस्य पादा..... "इति मन्त्रस्य व्याख्यावसरे महता देवेन नः साम्यं-सायुज्यं यथा स्यादित्यध्येयं व्याकरममिति भाष्यवचनम् । तदुक्तं वाक्यपदीये भर्तृहरिणा -

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥[16] इति।

अनया कारिकया ज्ञायते यद् व्याकरणं न केवलं शक्तिग्रहोपायः अपितु ब्रह्मसाक्षात्कारार्थमपि व्याकरणम्। अत्र सिद्धिशब्दस्य मोक्षरूपार्थः । अत्रेयं जिज्ञासा स्वभावत एव समुदेति यन् मोक्ष आत्मसाक्षात्कारेण भवति न तु शब्दसाक्षात्कारेण व्याकरणेन च शब्दसाक्षात्कारो जायते न आत्मसाक्षात्कारः। अतस्तेन आत्मसाक्षात्काराभावाद् मोक्षप्राप्तिर्भवितुं नार्हति। तर्हि कथम् ? व्याकरणस्य मोक्षप्राप्तिकारणत्वम् इति जिज्ञासायां भर्तृहरिणा तत्रैव समाहितं यद् -

"अत्रातीतविपर्यासः केवलामनुपश्यति।
छन्दस्यश्छन्दसां योनिमात्माछन्दोमयीं तनुम् ॥[17] इति।

तात्पर्यमिदं यदत्र व्याकरणे अतीतविपर्यास, अतीतो नष्टो विपर्यासो भ्रमो यस्य स सम्यग्ज्ञानवान् इत्यर्थः। छन्दस्य छन्दसे वेदाय हितः वेदग्रहणसमर्थः आत्मा छन्दसां-वेदानां योनि छन्दोमयीं छन्दोरूपां केवलां शुद्धां तनु सूक्ष्मां स्वस्वरूपभूतां वा प्रणवरूपां पश्यति।

शब्दब्रह्मण एव विवर्तो जीवः, ‘‘स एव जीवो विवरप्रसूतिः' इति भागवतात्। तथा च शब्दसाक्षात्कार एव आत्मसाक्षात्कारः । एतेन व्याकरणस्य मोक्षहेतुत्वं सिद्धमेव। अत्रेदं रहस्यं यद् व्याकरणज्ञानान्तरं शब्दविषयकभ्रमो न जायते। मानवाः साधुशब्दज्ञानविशिष्टाः भवन्ति। तदानीमात्मा वेदज्ञानसमर्थः सन् छन्दसां शुद्धप्रणवरूपब्रह्म पश्यति।

वस्तुतस्तु पश्यन्तीवागेव जीवः (आत्मा)। अतः पश्यन्त्याः साक्षात्कार आत्मसाक्षात्कार एव । अतः शब्दसाक्षात्कारद्वारा व्याकरणं मोक्षहेतुरिति।

शब्दाज्ञानमुभयथा भवति शब्दद्वारा, लक्षणद्वारा च। तथाहि साधु शब्दमुपद्दिश्य अतोऽन्ये असाधवः उताहो असाधुशब्दान् उपदिश्य अतोऽन्यः साधुरिति। इक कर्मकमुच्चारणं स्थाने यणकर्मकमुच्चारणं साधुरिति । ‘‘इको यणचि" लक्षणज्ञानपुरस्सरं साधुशब्दज्ञानम्। तदुक्तं महाभाष्ये- 'लक्ष्यलक्षणे व्याकरणमि' ति। लक्ष्यः शब्दः, लक्षणं सूत्रमेतदुभयं व्याकरणम् । अतः केचन लक्ष्यैकचक्षुष्काः केचन लक्षणैकचक्षुष्काः भवन्ति व्याकरणज्ञानपुरस्सरं शब्दप्रयोगेण धर्मो भवति अतो नूनं व्याकरणमध्येतव्यम् । व्याकरणशास्त्रस्य, महत्त्वम् आदिकालतः प्रसिद्धम्। यथा च रामायणे हनुमतः वाक्यं श्रुत्वा राक्षसराजा रावणो निजगाद -

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहुव्याहरतानेन न किञ्चिदपभाषितम्॥[18] इति।

यथा-तितउ सक्तुं परिपवनं करोति तथैव व्याकरणज्ञानमपशब्दान् पृथक् करोति। व्याकरणाध्ययनेन पदपदार्थज्ञाने असन्देहो भवति, शब्दस्य स्वरूपं सुस्पष्टतया ज्ञायते। अत एव व्याकरणज्ञातारोऽध्येतार एव विद्वांसः कथ्यन्ते। अत्रैषा श्रुतिः प्रमाणम् -

"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसने जायेव पत्य उशती सुवासाः ॥[19] इति।

व्याकरणस्य परम्परा सृष्टेरारम्भादेव प्रावर्तत। यथा च श्रूयते- "ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्य, ऋषयो ब्राह्मणेभ्यः इति।

इत्थं व्याकरणस्येयं परम्परा त्रिधा विभक्तुं शक्यते प्राक्पाणिनेः, पाणिनिसमकालम्, उत्तरपाणिनि च। - पाणिनेरष्टाध्यायायां केषाञ्चन वैयाकरणानामुल्लेखः प्राप्यते इति ते पाणिनेः प्राक्वर्तिनः। तथाहि -

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥ इति।

सत्स्वप्यनेकेषु व्याकरणेषु साम्प्रतं पाणिनीयं व्याकरणं लौकिक वैदिकोभयशब्द निष्पत्तिसाधकत्वादतिमहत्वाधायिकं वर्तते।

म्लेच्छताया निवारणमपि व्याकरणस्य प्रयोजनं निगदितं यतो म्लेच्छो वै अपशब्दः । अतः प्रोच्यते -

'यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्॥ इति ।

व्याकरणं भाषायां संस्कारं सम्पादयति। एवञ्च भाषायाः स्वरूपं संरक्षति । अनेन कारणेनैव सहस्रेभ्यो वर्षेभ्यः संस्कृतभाषायाः स्वरूपम् अविछिन्नम् अनुवर्तते।

शब्दानुशासनस्याभावे विशृङ्खला भाषा अनेकधा परिवर्तते। तस्या मूलस्वरूपं ज्ञातुमशक्यं भवति। तथा च प्राचीनसाहित्यस्य विज्ञानस्य चाध्ययनं दूरूहं जायते। संस्कृतं संश्लिष्टा भाषा वर्तते। प्रकृतिप्रत्ययोः पृथक् प्रयोगो न भवति।" न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः इति नियमो वर्तते।

इत्थं महत्त्वपूर्णायाः संश्लिष्टायाः संस्कृतभाषायाः विश्लेषणेऽपि व्याकरणमतीव महत्त्वपूर्ण वर्तते।

**व्याकरणशास्त्रस्य दर्शनत्वम्-** दृश्यते विचार्यते आत्मतत्वं येन तद् दर्शनमिति व्युत्पत्त्या ब्रह्मचिन्तनपरकं मोक्षप्रदर्शकं शास्त्रं दर्शनं कथ्यते। व्याकरणस्य कथं दर्शनत्वमिति जिज्ञासायां श्रुतिस्मृतिप्रमाणाभ्यां व्याकरणस्यापि दर्शनत्वं संसाध्यते तथा च 'श्रुति वागेव विश्वा भूवनानि जज्ञे।

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभूवा,
आदौ वेदमयीदिव्या यतः सर्वाः प्रवृत्तयः ॥[20] इति ।
"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।

उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्श शिवसूत्रजालम्॥
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[21] इति ।

इत्यादियुक्तिभिः व्याकरणस्य दर्शनत्वं संसिद्धमेव । अतो यथा वेदज्ञानेन वेदपारायणेन च मोक्षप्राप्तिः तथैव व्याकरणाध्ययनेन व्याकरणपारायणनेन च पुण्यं लभन्ते जनाः। तदुक्तम् ऋक्तन्त्रव्याकरणे शाकटायनोऽपि- 'इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्यः ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते,-न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिः' इति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः । तत्त्वञ्च नन्दिकेश्वरकृत काशिकायां स्पष्टम् । व्याकरणस्य दर्शनत्वसंसाधने आचार्यस्य भर्तृहरेः परमवदानं वर्तते। वाक्यपदीये ब्रह्मपदवाक्येति त्रिकाण्डात्मके व्याकरणस्य दर्शनत्वं संसाधितम् यच्च तदुत्तरवर्तिषु व्याकरणेषु व्याकरणान्तरेषु शास्त्रेष्वपि प्रमाणत्वेन जरीगृह्यते ।

वैयाकरणभूषणसारे आचार्यः कौण्डभट्टः वाक्यपदीयस्य कारिकां स्वसिद्धान्तप्रमा णीकरणार्थ प्रास्तौत्। वैयाकरणकेसरी श्रीमान् नागेशः स्वकीय वैयाकरण सिद्धान्तमञ्जूषादिषु ग्रन्थेष्वपि व्याकरणस्य दर्शनत्वं संसाधयन् भर्तृहरेः कारिकां प्रमाणत्वेन प्रास्तौत्। इत्थञ्च अनेकाभिः युक्तिभिः ''समाननामरूपत्वा च्चावृतावप्यविरोधो दर्शनात्स्मृतेश्च" व्याकरणस्य दर्शनत्वं सिद्धयति ।

**शब्दशक्तिप्रकाशिकाकारस्य व्यक्तित्वं कृतित्वं च -** जगदीशभट्टाचार्यः यादवचन्द्रविद्यावागीशस्य पुत्रः जगद्विख्यातस्य चैतन्यमहाप्रभोः श्वशुराणां सनातनमिश्राणामात्मजस्य प्रपौत्रः आसीत् । यादवचन्द्रविद्यावागीशस्य पञ्च पुत्रा अभूवन, जगदीशः तेषु तृतीयः पुत्रः आसीत् । यदा जगदीशः पञ्चवर्षदेशीय आसीत् तदैवास्य पिता स्वर्गमगमत् तस्मात् कालात् एतस्याग्रजः षष्ठीदासः लालनपोषणादिप्रबन्धं कृतवान्। एवं गच्छता कालेन कदाचिदष्टादशवर्षदेशीयोऽसौ पक्षिशावकानाहर्तुं दुरारूढं तालतरुम् आरुरोह तदानीं दैववशात् पक्षिशावकानत्तुम् एकेन कृष्णसर्पण फणामातत्य दष्टुमुपक्रान्तम्, दृष्ट्वैव तमुत्पन्नप्रतीकारबुद्धिर्निर्भीको जगदीशो द्रागेव दृढमुष्ट्या सर्पग्रीवामाक्रम्य क्रकचायमानायां तालदण्डधारायां निघृष्य छित्वा च सुदूरं चिक्षेपेति वदन्ति वङ्ग. देशीयेतिवृतज्ञाः। एतादृशं कार्य श्रीमते जगदीशाय भाविमगङ्गलवर्धकं बभूव । यतोहि तत्र समासन्नेन केनचित् यतिनोक्तसर्पमारणकृत्यान्निर्भीकत्वं प्रत्युत्पन्नमतिं चावलोक्य तरोरवारूढस्य जगदीशस्य तथोपदिष्टम् यथोज्झितसकल दुर्वृत्तव्यवहारेण जगदीशेन तत्कालमारभ्य तस्मादेव संन्यासिनोऽध्येतुं प्रारेभे। पञ्चाशद्वर्णलिपिमात्रसंस्तवोऽप्यसौ सततं केवलं विद्याभ्यास एव तत्परोऽभूत्।

किमधिकं रात्रावध्ययनकाले निद्रां दूरीकर्तुं कुटीरस्य स्तम्भे शिखानिबद्धरज्जुको यदैवायं निद्रयाभिभूतः शिखानिकर्षमफतत् तदा निद्रां विहाय तारस्वरेण पठितपाठमावर्तयत् अस्य जीवने धनस्याभाकः आसीत्। अतो निर्धनतया तैलं क्रेतुमनीशेनानेन शुष्कवंशपत्राणां दिने पुजीकृतानामेकैकेन प्रज्वालितोऽनलः पुस्तकवाचनप्रदीपार्थमकल्प्यत्। इत्थं द्वित्रैरेव हायनैर्व्याकरणं काव्यं कोशं च समापयता दुर्वृत्तदशायां नवद्वीपवासि स्थापितनिकर्षसूचकाऽपभ्रष्ट 'जगाजगा' इति नामधारिणा जगदीशेनाचिरादेव विद्याव्यसन्नितयोत्कर्षसूचकं प्रेम्णा सादरसंभाषितं 'जगु जगु' इतिनाम प्रतिपेदे। अथ न्यायशास्त्रमध्येतुं स तदानीमसत्प्रतिपक्षस्य विद्वत्तिलकायमानस्य भवानन्दसिद्धान्तवागीशस्य चतुष्पाट्यां प्रविश्य न्यायशास्त्रमधीतवान्। यद्यपि छात्रबाहुल्यात् सर्वान् छात्रान् स्वयमध्यापयितुमनर्हेण भवानन्देनाधस्तनपाठा विद्यार्थिनः समुच्चतरपाठैः शिष्यैरध्यापिता अभूवन, येन जगदीशो द्रुतं नातिपरिचितोऽभूत् तथापि स्वकीयया तर्कशक्त्यैवाहोभिः कैश्चित्सम्यक् संस्तुतोऽभूत् जगदीशभट्टाचार्यो भवानन्दसिद्धान्तवागीशेन। कदाचित् अन्तर्वाटिकायामलिन्दे सिद्धान्तवागीशः महोदयः सन्ध्योपासनाकुर्वन् आसीत् तदा मिथः शास्त्रार्थ प्रकुर्वतां छात्राणां मध्ये पूर्वपक्षवादिनः एकमात्रस्य जगदीशस्योच्चैस्तरं स्वरमाकर्ण्य भार्यां प्रति पृष्ठम्- 'कस्यायं कलगम्भीरः कण्ठराव' इति। यः खलु वैदिकपोतकः पूर्वं नवद्वीपे 'जगा' इति अधुना च 'जगु' इत्याहूयते तस्यैवाऽयं स्वर इति भार्ययोत्तरिते आनन्दनिर्भरेण भवानन्देनोक्तम्-धन्योऽहं, यस्य ममान्तेवासी -

आदौ जगा जगुः पश्चात् जगाजगुरतः परम्।
अधुना ज्ञानसम्पत्त्या जगदीशायते जगा ॥[22] इति ।

तत्र किञ्चित् कालानन्तरं जगदीशः पाठं समाप्य गुरोर्लब्धतर्कालङ्कारोपाधिकः छात्रान् अध्यापयितुमारेभे। अध्यापनागुणगणाकृष्टेभ्यश्च भूरिशश्छात्रेभ्यः पाठयन् रधुनाथशिरोमणिकृतस्य दीधितिग्रन्थस्यान्यै नैयायिकैर्निबद्धा अपि व्याख्या अपव्याख्या इत्याकलय्यान्तः परिदूनमानसस्तट्टीकां विरचयितुमारब्धवांस्तर्कालङ्कारमहोदयः । यतः तेनैवोक्तं व्याख्यादौ -

प्राच्यैरनुचितविविधक्षोदैः कलुषीकृतोऽप्यधुना।

दीधितियुतमणिरेष श्रीजगदीशकृतः स्फुरतु॥[23] इति चाहुर्वङ्गीयाः ।

ग्रन्थविरचने प्रवृत्तोऽप्यसौ गार्हस्थ्यवृत्तेरसम्यक्तया निराकुलं न तन्निष्पादयितुमशकद्यदा तदाऽनन्यगत्या विद्याव्यसनेन चाभिभूयमानाः शूद्रान्धनिकान् तांत्रिकी शिक्षामुपदिश्य तेभ्यः प्राप्तसमुचितधनो गार्हस्थ्यमनाकुलं साधयन्नपे तान्तरायो निरन्तरं ग्रन्थरचनातत्परः क्रमेण शिरोमणिकृतचिन्तामणिव्याख्यानस्य दीधितेर नुमित्यादिबाधान्तप्रकरणानां जागदीश्याख्यां टिप्पणी चिन्तामणिमयूखादिकं च विरच्याद् भुतविचारशक्त्या विद्वन्मण्डलं मोहयन् स्वसर्वस्वभूतां शब्दशक्तिप्रकाशिकामपि व्यरचयत्। अत एवाऽऽभाणिका - 'जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिके' ति। तदीय सर्वनिबन्धेषु शब्द संक्षेपेऽपि यदर्थगाभीर्य तन्नाव्यक्तं नव्यनैयायिकानाम् । ई. पञ्चत्रिंशाधिकशोडषेऽब्दे शब्दशक्तिप्रकाशिकां निबद्धवान् स इत्यैतिह्यविदां निर्णयः।

शब्दशक्तिप्रकाशिकायाः खलु निर्माता तार्किकुलनिकरकैरवकलाकरोऽति मेधावी तर्कालङ्कारविरूदावलीसमलङ्कृतः श्रीमान्महामहोपाध्यायो जगदीशभट्टा चार्यः। १. तत्वचिन्तामणिदीधितिप्रकाशः २. चिन्तामणिमयूख ३. न्यायादर्श ४. पदार्थतत्त्वनिर्णयादिटीकानिबन्धान् विरचयाऽमुना तार्किकप्रवरेण 'तर्कामृतम्' 'शब्दशक्तिप्रकाशिका' चेति मूलग्रन्थद्वयमपि निर्माय या तार्किक भुवने प्रख्यातिरधिगता सा नैव तिरोहिता नैयायिकानां वैयाकरणानां च विदुषाम् । यतोहि अयं जगदीशसर्वस्वभूतो शब्दशक्तिप्रकाशिकाख्यो महानिबन्ध उभयेषामपि शब्दखण्डेऽद्धुतां व्युत्पत्तिमादधातुं क्षम इति तदध्येतृभिः स्वयमेवावधारयिष्यते।

**शब्दशक्तिप्रकाशिकाया वैशिष्ट्यम् -** आन्वीक्षिक्याभ्यन्तरविषयनिमग्नकर्कश प्रज्ञाप्रभावविरचितः श्रीमान् महामहोपाध्यायो जगदीशभट्टाचार्यः प्रारम्भ एव प्रथमे नामप्रकरणे जातिशक्तिवादिनां भट्टानां लक्षणया जातिविशिष्टव्यक्तिबोधं स्वीकुर्वतां मण्डनमिश्राणां प्राभाकराणां च मतानि निबन्धकारेणाऽगाधप्रौढपाण्डित्यप्रबोधकलेखशैल्या खण्डितानि। एवमेवात्रा लङ्कारिकाभिमतव्यञ्जनावृत्तिखण्डनं, पङ्कजादियोगरूढनामविचारे मीमांसकवैयाक रणमतयोर्निरसनं चिन्तामणिकृन्तमेऽस्वरसप्रदर्शनं चातीवचमत्कारमावहति। यद्यपि भवानन्दसिद्धान्तवागीशजयरामपञ्चाननादिभिः समासवादे षट्कारकविवेचनादौ च समासनिरूपणं कारकविवेचनं च यथावद्विहितन्तथापि समासशक्तिवादिवैया करणमतखण्डनादिपुरस्सरमुदाहरणविवेचनपूर्वकं प्राचीनार्वाचीनमतप्रदर्शनं विदधता जगदीशतर्कालङ्कारेण सविस्तरमुभयनिरूपणे यत्सामर्थ्य न्यायव्याकरणयोरगाध पाण्डित्यं च प्रदर्शितं तदन्यत्र दुर्लभमिति ब्रूमः। समासकारकप्रकरणयोर्मध्ये सुब्विभक्तिप्रकरणं च व्याकरणानुशासनप्रदर्शनद्वारा छात्राणामुपकाराय संक्षेपतो यथाऽत्र निबद्धं न तथाऽन्यत्रेति तर्कयामः। जगदीशतर्कालङ्कारविरचितश्चतुर्थः कारकप्रकरणमहासागरस्तु सर्वान् वैयाकरणमहानिबन्धानप्यतिशेत इत्यत्र न कश्चित्सन्देहः। तत्र चोदाहरणनिकरविवेचनसहितं प्रथममपादानादिभेदेन षड्विधकारकसुब्विभक्तिनिरूपणम् (१) उक्तानुक्ततानियामकप्रदर्शनपूर्वकमुक्ता नुक्तकारकवर्णनम् (२) विशेषविधिवर्णनपुरस्सरं भर्तृहर्यादिप्राचीनसंवादेन कर्तृत्वक मत्वयोरनुक्तविधयाऽन्वयबोधोपयुक्तविभक्तितकथनम्। (३)निष्ठादिविवरणम् (४)उपदविभक्तिवर्णनम् (५)चोदाहरणनिकुरुम्बविवेचनपूर्वकं महताऽऽडम्बेरण जगदीशभट्टाचार्येण विहितम्। एवमेवाख्यातप्रकरणे लडादिदशविधतिङ्लक्षणानि मीमांसकवैयाकरणमतखण्डनपूर्वकमाख्यातार्थविवेचनं रत्नकोषकारादिमतविवेचन पूर्वकं विध्यर्थविचारश्च यया प्रौढविद्वत्तासूचकलेखनशैल्या निबद्धः स नान्यत्र कुत्रचिदुपलभ्यते एकत्र वैयाकरणादिमहानिबन्धेषु । उदाहरणविवेचनसहितस्सविभागो धात्वंशप्रत्यय (नामधातु) विचारश्चास्य प्रकरणास्यान्ते भागुरिप्रणीतानुशासन कारिकोल्लेखपूर्वकं सम्यनिरूपितः ।

अन्ते चातिविस्तृतद्वितप्रकरणस्थापत्याधिकारीयाणां चातुरर्थिकानां शैषिकाणां च प्रत्ययानामुदाहरण(शद्यनिबन्धनपूर्वकं सङ्ग्रहो विहितस्तद्धिताख्ये प्रकरणे। एवञ्चायं निबन्धस्सर्वेषां व्याकरणपदार्थानां व्युत्पत्तिमादधानस्सर्वथोभयत्र शास्त्रेऽनुरागवद्भिर्विद्वद्भिरवश्यमध्येतुमर्ह इति जगदीशभट्टाचार्येण महता श्रमेण निबद्ध इत्यत्र नास्ति संशयः ।

**वैयाकरणभूषणसारकर्तुरैतिह्यं कृतित्वं च -** व्याकरणशास्त्रार्णवतलस्पर्शिप्रतिभस्य न्यायमीमांसादिशास्त्रावगाहनलब्ध वैदुष्य प्रकर्षस्यास्य ग्रन्थकर्तुः श्रीकौण्डभट्टस्य जीवनवृत्तं नातितिरोहितम् । जीवनवृत्तनिर्देश आधुनिकी मर्यादा। यश्च न निर्दिशनि स मर्यादामाभिशेते इति मन्यन्ते आधुनिकाः शिक्षविदः।

ग्रन्थेऽस्मिन् भूषणसारे कारिकाभागः श्रीमता वैयाकरणमूर्धन्येन विश्रुतयशोराशिना श्रीभट्टोजिदीक्षितेन विरचितः । तासां कारिकाणां व्याख्यानं भाष्य वाक्यपदीयादिवचनोपोद्बलितं गम्भीराशयं व्याकरणसिद्धान्तबोधकं कौण्डभट्टकृतं केवलमुपलभ्यते।

कुलस्यास्य वंशवृक्षदर्शनेनैतत् ज्ञायते यदस्मिन् वंशे लक्ष्मीधरनामा कश्चन प्रकाण्डपण्डितोऽभूत्। तस्य द्वौ पुत्रावास्ताम् –

(१) रङ्गोजिभट्टः।

(२) भट्टोजिदीक्षितश्च।
कौण्डभट्टः रङ्गोजिभट्टस्य पुत्र आसीदिति तदीयेन मङ्गलश्लोकेन ज्ञायते। यथा- पाणिन्यादिमुनीन् प्रणम्य पितरं रजोजिभट्टाभिधम्। अनया दिशा एतद्विज्ञातं भवति यत् भट्टोजिदीक्षितस्य परिवारो व्याकरणशास्त्रविचारे प्रसारे च संलग्न आसीत्। श्री भट्टोजिदीक्षितस्य समयः १६५० तमो वैक्रमाब्दो निर्धारितः। एतत् समान काल: पण्डितराजो जगन्नाथः । भट्टोजिदीक्षितः कदाचित् पण्डितराजसभायां म्लेच्छपदेन संबोधितवान्। जनसंसदि तादृशं कटुवचनं श्रुत्वा पण्डितराजः अग्लासीत्। ग्लायन्नसौ दण्डादिग्रहारं दुवर्चनं वा प्रतिकारोपायं विगणय्य दीक्षितेन विरचितां "मनोरमां सिद्धान्तकौमुदीटीकां यत्र तत्र दूषयामास। मनोरमाकुचमर्दिनीति नाम्ना प्रणीते ग्रन्थे च तानि दूषणानि निर्दिश्य विदुषां समक्षमुपस्थाप्यस्वस्य म्लेच्छतामनया दिशा प्रासाधयत्। मङ्गल श्लोकसन्दर्भे एव इदमप्युक्तम्-भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये।
श्रीभट्टोजिदीक्षितः पण्डितराजजगन्नाथस्य समकालिक आसीदितीतिहा सविदां निर्णयः। पण्डितराजजगन्नाथः 'शाहजहान्' इत्याख्यस्य मुगलसम्राजः समये आसीदित्यत्रापि प्रायः समेषामितिहासविदुषामैकमत्यम्। पण्डितराजरचितं विश्रुतं पद्यमेव तत्र प्रमाणम्। यथा -

दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः॥

अतः दिल्लीश्वरस्य 'शाहजहान्' इति ख्यातस्य निकटे पण्डितराजस्य स्थितिरासीदिति सिद्धयति। तस्य राज्ञः समयः षोडशशताब्दी आसीदिति समकालिकतया भट्टोजिदीक्षितस्यापि स एव समयो निश्चेतुं शक्यते। कौण्डभट्टो भट्टोजिदीक्षितस्य भातृज आसीत्। स च भट्टोजिदीक्षितविरचितशब्दकौ स्तुभोक्तानामर्थानां संक्षेपेण वैयाकरणभूषणसारे व्याख्यानं कृतवान्। यथा चोक्तम्

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते॥[24]

अतः किञ्चित् पितृव्योतरवर्तितया कौण्डभट्टः १६०५ ख्रिस्ताब्देऽविद्यतेति निर्धारयितुं शक्यते। अयं हि कौण्डभट्टः सर्वेश्वरेति नामधेयस्य शेषकृष्णपुत्रस्य शेषरामेश्वरस्य शिष्य आसीत्-इति वैयाकरणभूषणसारस्यान्तिमेन श्लोकेन ज्ञायते।
यथा -

अशेषफलदातारमपि सर्वेश्वरं गुरुम्।
श्रीमद्भूषणसारेण भूषये शेषभूषणम्॥

श्री के. पी. त्रिवेदिना संसाधितं यत् कौण्डभट्टस्य पूर्वजा मूलतो गोदावरीतटनिवासिन आसन्। बहुकालानन्तरं ते तत आगत्य काश्यामवसन्। भट्टोजिः, रङ्गोजि:- इत्यादिशब्देषु 'जि' शब्दयोगेनैतत् प्रतीयते यदयं मूलतो महाराष्ट्रिय आसीत्। केषाञ्चन्मतेऽयं ''सारस्वतब्राह्मणः' आसीदिति।
अस्य पूर्वजा: महाराष्ट्रप्रान्ते मन्दिरे देवपूजनोपजीविनी दीक्षितोपाधिधारका अवर्तन्त। अस्मिन् वंशे नैके विश्वविश्रुताः पण्डिता समभवन्। अयं कौण्डभट्टो न केवलं व्याकरणशास्त्रस्यैव पण्डितोऽपि तु न्यायमीमांसादिशास्त्रेष्वपि प्रकृष्टेन पाण्डित्येनालङ्कृत आसीत्। तेन हि न्यायमीमांसादिवचनव्याख्यातॄणां स्वसिद्धान्तप्रकाशनाय च प्रतिज्ञा कृता। उक्तञ्च -

गौतमजैमिनीयवचनख्यातृभिर्दूषितान्।
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ||

महाराष्ट्रियो दाक्षिणात्यो वेति अन्यतरसाधकदृढतरप्रमाणानुपलम्भात् न निरचैषम्। प्रमाणेन यथाकथञ्चित कालनिर्णये कृते न काचिद् विस गतिरुपजयाते। देशविशेषर्निधारणन्तु औत्कण्ठ्यमात्रमवसादयति। नातः प्रयोजनमाकलयामि। भारतीयकल्पनाव्यतिरेकेण प्रान्तीयभावना न साधीयसी कल्पते इति समेषामक्षिसमक्षमतो न विशिष्यवचनार्हम्।
कौण्डभट्टो वैयाकरणभूषणसमानविषयकं ग्रन्थत्रयं लिलेख। तद्यथा
(१) वैयाकरणभूषणम्।
(२) वैयाकरणभूषसारः।
(३) लघुवैयाकरणभूषणसारः।
एकस्यैव ग्रन्थस्य भागत्रयात्मिका विभागपरम्पराऽन्यत्राप्यवलोक्यते। यथा नागेशभट्टेन मञ्जूषाविषये ग्रन्थत्रयमलेखि -
(१) वैयाकरणसिद्धान्तमञ्जूषा।

(२) वैयाकरणलघुसिद्धान्तमञ्जूषा।
(३) वैयाकरणपरमलघुसिद्धान्तमञ्जूषा।
एतज्ज्ञायते यदस्य वंशस्य लक्ष्मीधरनामा कश्चन पूर्वपुरुष आसीत्। तस्य द्वौ पुत्रावास्ताम् -
(१) भट्टोजिदीक्षित।
(२) रङ्गोजिभट्टः।
तस्य रङ्गोजिभट्टस्य पुत्रः कौण्डभट्टोऽभवत्। विद्यायोनिसम्बन्धाभ्यां कौण्डभट्टस्य वंशवृक्षो वक्ष्यमाणरूपेण निरूपयितुं शक्यते -

लक्ष्मीधरः (पिता)

रङ्गोजिभट्टः (पुत्रः) | भट्टोजिदीक्षितः(पुत्रः)
।
कौण्डभट्टः (पुत्रः) | भानुदीक्षितः (वीरश्वरः) पुत्रः
।
नागेशभट्टः (शिष्य)

शेषकृष्णः

भट्टोजिदीक्षितः (शिष्यः) | वीरेश्वरः (पुत्रः)
।
पण्डितराजजगन्नाथः (शिष्यः)

कौण्डभट्टेन व्याकरणन्यायादिविषयका बहवो ग्रन्थाः विरचिताः। डां. आफ्रेख्तमहोदयेन 'कैटलाग्स कैटलागरम्' इति ग्रन्थेऽधोलिखिताः ग्रन्थाः कौण्डभट्टेन रचिता इति प्रतिपादितम् -
(१) तर्कप्रदीपः।
(२) तर्करत्नम्।
(३) न्यायपदार्थदीपिका।
(४) वैयाकरणसिद्धान्तभूषणसारः।
(५) वैयाकरणसिद्धान्तदीपिका।
(६) लघुवैयाकरणसिद्धान्तभूषणसारः।
(७) स्फोटवादः।

वैयाकरणभूषणसारस्य टीकाः
अस्य भूषणसारस्य सारौ निगूढतया तत्त्वतोऽवगन्तुमशक्य इति कृत्वा सारल्येन स्फुटार्थावबोधाय बहुभिः पण्डितैः विविधा व्याख्या कृता। तासां विवरणमत्र प्रस्तूयते –
१. दर्पण टीका - पं. हरिवल्लभ कृता।
२. परीक्षा टीका - पं. भैरव मिश्र कृता।
३. कान्ति टीका - गोपालदेवकृता।
४. काशिका टीका - हरिशास्त्रिकृता।
५. विवृत्तिः टीका - रुद्रनाथरचिता।

६. भूषण व्याख्या - श्रीकृष्णमित्रकृता।
७. प्रभा - बालकृष्णपञ्चोली निर्मिता।
वैयाकरणमतोन्मज्जिनी - वनमालीमिश्रकृता।
६. शाङ्करी - शङ्करशास्त्रिकृता।
१०. सरला - गोपालशास्त्रिनेनेविरचिता
११. हिन्दी भाष्यम् - पं. ब्रह्मदत्त द्विवेदिरचिता

टीकाकाराणां परिचयः

दर्पणकार: श्रीहरिवल्लभः

पण्डितप्रवरः श्रीहरिवल्लभो वैयाकरणभूषणसारस्य दर्पणनाम्नी टीका व्यरचयत् । अयं हि कूर्मगिरिनिवासी उत्प्रभातीयोपनामकश्रीवल्लभस्य पुत्र आसीत्। अनेन स्वस्याष्टीकाया अन्ते स्वयमेव लिखितम् इति श्रीमत्कूर्माचला भिजनोत्प्रभातीयोपनामकश्रीवल्लभात्मजहरिवल्लभविरचिते भूषणसारदर्पणे स्फोटवादः समाप्तः ।

यतः १८५८ वैक्रमे विरचितायां काशिकायां दर्पणकारस्य बहुषु स्थलेषूद्धरणं वर्तते। अतः दर्पणकारस्य समयस्ततः पूर्व १८०० वै. इत्यनुमातुं शक्यते। इयं टीका पण्डितसम्प्रदाये संमानिता प्रौढा, आप्तवचनैरनप्राणिता इत्यामनन्ति विद्वांसः । स्वस्याष्टीकाया विषये स्वयमेव लिखति दर्पणकार: -

ज्ञात्वा श्रीफणिवाक्यजालमतुलं नैयायिकोक्तिरपि।
मीमांसानयमाकलय्य च मया सम्यकृते दर्पणे ||
अस्मिन् भूषणसारतां बुधजनः सोत्कण्ठमालोकतां।
या निश्वासमलीमसो न मुकुरस्तत्वार्थबोधक्षमः ||
आसीत् कूर्मगिरौ धरासुरवरः श्रीवल्लभः कोविदो।
वेदान्तेषु विनोदमजिरिरिति ख्याताऽस्ति यन्निर्मितिः ॥
तत्सूनुर्हरिवल्लभः समकरोत् सद्युक्तिमण्युज्ज्वलं।
श्रीमद्भूषणसारदर्पणमिमम्मोद य विद्यावताम् ॥

परीक्षाटीकाकार: श्रीभैरवमिश्रः

पण्डितप्रवरस्य श्रीभैरवमिश्रस्य समयो निः संशयं सर्वैरपि विद्वद्भिः वै. १८५०-११०० निश्चीयते। श्रीभैरवमिश्रेण न केवलं वैयाकरणभूषणसारस्य परीक्षानाम्नी टीका लिखिता, अपि तु शब्देन्दुशेखरे, परिभाषेन्दुशेखरे मनोरमाशब्दरत्ने च प्रखरपाण्डित्यपूर्णा च टीका रचिता। श्रीमिश्रेण लघुशब्देन्दुशेखरस्य चन्द्रकलाटीकायां तस्याः लेखनसमयोऽङ्कितः। उक्तञ्च -

शश्यष्टसिद्धिचन्द्राख्ये मन्मथे शुभवत्सरे।
माघे मास्यासिते पक्षे मूले कामतिथौ शुभा ॥
पूर्णा वारे दिनमणेरियञ्चन्द्रकलाभिधा।
शब्देन्दुशेखरव्याख्या भैरवेण यथामति ॥

अस्यायमभिप्रायो यत् १८८१ वैक्रमे वर्षे माघकृष्णपक्षे मूलनक्षत्रे कामतिथौ रविवासरे लघुशब्देन्दुशेखरस्य चन्द्रकला' नाम्नी व्याख्या पूर्णतां गता। इत्थं ह्युपरिनिर्दिष्टसमयो युक्तिसङ्गत इति प्रतीयते।

'कान्ति व्याख्याकारः श्रीमन्नुदेवः

'मन्नुदेवः' वैयाकरणभूषणसारस्य 'कान्ति' नाम्नी व्याख्यामलिखत्। अयं हि वैद्यनाथपायगुण्डेमहोदयस्य शिष्य आसीत्। अस्य समयः १८४० वैक्रामाब्दो भवितुमर्हतीति निश्चिन्वन्तीतिहासविदः। अस्य विदुषो जीवनेतिवृत्तिविषये इतोऽधिकं किञ्चिन्नैव ज्ञायते।

‘काशिका' टीकाकारः श्रीहरिशास्त्री

श्रीहरिशास्त्री वैयाकरणभूषणसारस्य 'काशिका' नाम्नी टीकां निर्मिमे। इयं हि टीका १८६४ वैक्रमाब्दे मार्गशीर्षमासस्य पूर्णिमायां चन्द्रवासरे पूर्णतामगमत्। अयं हि हरिशास्त्री केशवदीक्षितस्य पुत्र आसीत्। श्रीहरिशास्त्रिणो नाम हरिरामदीक्षित आसीत्। आत्मपरिचयविषये ग्रन्थान्ते श्रीदीक्षितः स्वयमेदीवोगिरति -

योऽभूत पण्डितमण्डलीपरिणत श्रोताब्धिसारङ्गता,
स्वप्नो वेदविदां वरः परिवृद्वैर्भूमेः सदा वन्दितः।
श्रीमद्भरवशाङ्करीपदरजः सेवाप्तपूर्णार्थकः,
श्रीमत् केशवदीक्षितः समभवत् तस्यात्मजोऽभूद्धरिः॥

रामान्तः शिवपालिते शिवपुरे श्रींकाशिशब्दाभिधे,
तेनैयं खलु निर्मिता कृतिवरा श्रीभूषणे काशिका।
श्रीमभैरवपादसेवनवपुः श्रीकण्ठपादेऽर्पिता,
मोदं सन्तनुतां सदाप्तविदुषां सद्युक्तिभाजां चिरम्॥
धनराजानुजः श्रीमान् सखीदेव्यास्तु गर्भजः।
व्याख्याञ्चक्रे भूषणस्य यथामति शिवाप्तये॥
युगभूतदिगीशात्मसंमिते वत्सरे गते।
मार्गशीर्षशुक्लपक्षे पौर्णमास्यां विधोर्दिने॥
रोहिणीस्थे चन्द्रमसि वृश्चिकस्थे दिवाकरे।
समाप्तिमगमत् ग्रन्थस्तेन तुष्यतु नः शिवः॥

विवृतिकारो रुद्रनाथः रुद्रनाथो वैयाकरणभूषणसारे विवृतिनाम्नी व्याख्यामलिखत्-इति युधिष्ठिरमीमांसकेन स्वीये संस्कृतव्याकरणशास्त्रस्येतिहासे लिखितम्। एतद्विषये किञ्चिदधिकं नैव ज्ञायते।

वैयाकरणभूषणसारः रत्नप्रभाकर्ता कृष्णमित्रः

कृष्णमित्रः भूषणसारे 'रत्नप्रभा नाम्नी व्याख्यां प्राणैषीत्। अनेन शब्दकौस्तुभे 'भावप्रदीप' नाम्नी व्याख्याऽपि रचिता। अयं हि उत्तरप्रदेशस्य सुल्तानपुरजनपदे लक्ष्मणपुरनिवासिनः पण्डितश्रीरामसेवकत्रिपाठिनः पुत्र आसीत्। अनेनैव लघुमञ्जूषोपरि कुञ्जिका, कौमुद्यां रत्नार्णवः प्रौढमनोरमायाञ्च कल्पलता टीका विनिर्मिता। अयं नागेशभट्टसमकालिकोऽभूत्। अतोऽस्य समयः १७५० वै. निश्चेतुं शक्यते।

'प्रभा टीकाकर्ता बालकृष्णपञ्चोली

पञ्चोलीत्युपाख्येन बालकृष्णशर्मविदुषा वैयाकरणभूषणसारस्य 'प्रभा नाम्नी टीका रचिता। एतावती विस्तृता, गभीरा, पाण्डित्यपूर्णा च काचिदन्या टीका नाभूत्। एते खलु विश्वविश्रुतपण्डितानां श्रीसभापतिशर्मोपाध्यायानां शिष्या आसन्। एते गुर्जरप्रान्तस्य 'बडौदा' राज्ये 'वसाई' ग्रामनिवासिनः श्रीनीलकण्ठस्य पुत्राः बभूवुः। टीकायाः प्रारम्भे एतैरात्मपरिचयो विस्तरेणोपन्यस्तः। 'प्रभा टीका २०४० वै. वर्षे प्राकाश्यमुपगता।

श्रीपञ्चोलिमहोदयाः प्रथमं काश्यां खेतानसंस्कृतमहाविद्यालये प्रधानाध्यापका आसन् तदनु काशिकराजकीयसंस्कृतमहाविद्यालये, वाराणसेयसंस्कृतविश्ववि द्यालये च व्याकरणप्राध्यापकपदेऽधिष्ठिताः जाताः। ततोऽवकाशं प्राप्य इदानीं ते गुर्जरप्रान्तस्य 'अहमदाबाद' इत्याख्ये नगरे स्वभवने निवसन्ति।

**शाङ्करी टीकाकारः श्रीशङ्करशास्त्री -** श्रीरङ्गभट्टपुत्रेण शङ्करशास्त्रिणा १६५७ खिस्ताब्दे 'शाङ्करी' नाम्नी भूषणसारस्य टीका रचिता। इयं टीका सुविस्तृता, सारल्येनावबोधुं शक्या, पाण्डित्यपूर्णा सन्दर्भसंयोजिता चेत्यवगम्यते। पुण्यपत्तनस्यानन्दाश्रममुद्रणालये १६५७ खिस्ताब्दे इयं टीका प्रकाशिता जाता। अयं हि गुरुपरम्परया अर्थग्रन्थसिद्धान्तान् सम्यक् विचार्य तदुपयोगं च कृत्वाऽत्यन्तपरिश्रमपूर्वकमिमां टीकां लिखितवान्।

भारद्वाजकुलेऽस्य जन्म आसीत्। अस्य पिता रङ्गभट्टः माता च रमेति नाम्ना ख्याता आसीत्। मीमांसापण्डितः श्रीनरहरिरस्य ज्यायान् भ्राता आसीत्, यो हि 'विद्याशंकरभारती' इति नाम्ना जगद्गुरुपदे आरूढ आसीत्।

सरला टीकाकारो गोपालशास्त्रिनेने

२००० वैक्रमाब्दे गोपालशस्त्रिनेने–नामकेन महापण्डितेन रचितेयं टीका । सा चेयं टीकाऽन्वर्थतया अतीवसरला, संक्षिप्ता, विद्वज्जनमनोहारिणी चावलोक्यते । 'गोपालशास्त्रि' नेने–महोदयाः काश्यां लब्धप्रतिष्ठाः व्याकरणशास्त्रं कृतश्रमाः विद्वांस आसन्। द्वित्रिवर्षेभ्यः प्रागेते काश्यां शिवसायुज्यं प्राप्ता इति।

**'हिन्दी भाष्यकारः पण्डितब्रह्मदत्तद्विवेदी -** २०४२ वैक्रमाब्दे पण्डितवरेण ब्रह्मदत्तद्विवेदिना वैयाकरणभूषणसारस्य 'हिन्दी' भाष्यं कृतम्। इदं भाष्यमतीवविस्तृतं सुस्पष्टमल्पधियामपि बोधगम्यं सर्वथाऽपूर्वञ्च विद्यते। इतः पूर्वं वैयाकरणभूषणसारस्य प्रमाणभूता काचिद् 'हिन्दी' व्याख्या नाभूत्। पं. ब्रह्मदत्तद्विवेदिनो महामहोपाध्यायानां पण्डितश्रीहरिहरकृपालुमहोदयानां पुत्राः आसन्। व्याकरणन्याय–वेदान्तसाहित्यादिषु शास्त्रेष्वेतेषां वैदुष्यं ख्यातमिति जना अवगच्छन्ति। एते खलु प्रयागजनपदे 'पण्डितपुर' ग्रामवासिनः आसन्।

पितृचरणयोरेतैः सर्वा अपि विद्याऽधीता। एतेषां कर्मभूमिः विहारप्रान्तस्य 'पटना इति महानगरी आसीत्। तत्रैव एते श्रीरामनिरञ्जनसंस्कृतमहाविद्यालये बहुकालं प्रधानाध्यापकपदे ससम्मानमधिष्ठिता आसन्। ऐषम एते काश्यां निवसन्तः स्वनिपुणमतिभिः नागेशभट्टकृतशब्देन्दुशेखरस्य सन्ध्यन्तभागस्य 'हिन्दी व्याख्यां विधाय शिवसायुज्यमवाप्नुयुः ।

यथा हरिवल्लभ कृता दर्पणटीका श्रीहरिशास्त्रिकृता काशिका भेरवमिश्रकृता परीक्षा गोपालदेव कृता कान्तिः रूद्रनाथकृता विवृतिः श्रीकृष्णमित्रकृता भूषणव्याख्या पञ्चोलीकृता प्रभा इत्याद्याः सन्ति। परमेतासु न्यायमीमांसादिविचारमांसला विस्तृताभिप्रायप्रकाशिका दर्पणसभा नान्याः टीकाः समुट्टङ्कन्ते।

**वैयाकरणभूषणसारस्य वैशिष्ट्यम्-** व्याकरणग्रन्थेषु शब्दार्थसाधनपरो वैयाकरणभूषणसारो महत्तमं स्थानं विभर्ति। शास्त्रप्रतिपादनरीत्या व्याकरणशास्त्रग्रन्थाः द्विधा विभज्यन्ते -

शब्दग्रन्थाः, अर्थग्रन्थाश्चेति। शब्दग्रन्थेषु प्रकृतिप्रत्ययरूपेण पदानि प्रविभज्य लोपागमवर्णविकारादिभिः कार्यैः शब्दसिद्धिः क्रियते। अर्थग्रन्थेषु शब्दसिद्धि मनसि कृत्वा तदनुरोधेनैवार्थानुसन्धानं क्रियते। रूपावतारप्रक्रियाकौमुदीसिद्धान्त कौमुद्यादयो ग्रन्थाः तत्तत्सूत्रैः शब्दसाधुत्वमुपपादयन्ति, क्रमशः पदानि, वाक्यानि च संस्कुर्वन्ति। अतस्ते शब्दग्रन्था इति पदेन व्यपदिश्यन्ते। पाणिनेरष्टाध्यायी प्राधान्येन शब्दग्रन्थ एव। शब्दग्रन्थाध्ययनं विना न कोऽप्यर्थज्ञाने समर्थो भवितुमर्हतीति कृत्वा तत्प्रधान्यं सुस्पष्टम्। साधुत्वसम्पन्नेषु शब्देषु कः प्रकृत्यर्थः, कश्च प्रत्ययार्थः, कस्यार्थस्य विशेषणत्वम्, कस्य च प्राधान्यम्, दर्शनान्तरीयाणां मते कः प्रकृत्यर्थः कश्च प्रत्ययार्थः, कीदृशश्च शाब्दबोधः-इत्यादयो विषया अर्थग्रन्थेषु विविच्यन्ते। तेष्वर्थग्रन्थेषु वैयाकरणभूषासारोऽन्यतम इति विभावनीयम् । शब्दशास्त्रप्रवीणः श्रीमान् भट्टोजिदीक्षितः वैयाकरणसिद्धान्तप्रकाशकमतिविस्तृतं ग्रन्थं शब्दकौस्तुभाभिधं व्यरचयत्। तदाश्रयेणैव पुनस्तेन शाब्दबोधप्रक्रियाप्रकाशिका मतान्तरीयापसिद्धान्तनिरासिका च कारिकावली विरचिता। तां कारिकावलीमुपजीव्य वैयाकरणशिरोमणेः श्रीकौण्डभट्टस्यासाधारणप्रतिभाप्रादुभूतो वैयाकरणभूषसारो व्याकरणशास्त्रस्य मूर्धन्यग्रन्थेष्वन्यतमः। सम्यग्गृहीतार्थ एव वैयाकरणान् भृशं भूषयतीति निर्विवादम्।

भर्तृहरेरनन्तरं भट्टोजिदीक्षितकालपर्यन्तं काशिका-न्यास-पदमञ्जरी रूपावतारप्रक्रियाकौमुदीसिद्धान्तकौमुद्यादयो बहवो व्याकरणग्रन्थाः विरचिताः, किन्तु वस्तुगत्या प्राधान्येनार्थविचारपरः, व्याकरणदर्शनप्रतिपादकः कश्चन ग्रन्थो नैव निर्मितः। भट्टोजिदीक्षितः षोडशशताब्द्यां बभूव। तेन सम्पूर्णं महाभाष्यं सम्यगधीत्य भर्तृहरेः वाक्यपदीयञ्च सुसमीक्ष्य तत्र प्रतिपादितान् व्याकरणदर्शनसिद्धान्तान् संहत्य च शब्दकौस्तुभे ग्रन्थे द्वासप्ततिकारिकाभिः स्वीयाः सिद्धान्ताः प्रकाशिताः। तासु कारिकासु वर्णिताः सिद्धान्ता अतीवदुरूहाः, गहनाः, सारल्येनावबोधुमशक्या एवासन् । अतं एतत् काठिन्यमपाकर्तुं शिष्यसुखावबोधाय च भट्टोजिदीक्षितभ्रातुः रजोजिभट्टस्य पुत्रः प्रकाण्डपण्डितः कौण्डभट्टः, कारिकाव्याख्यारूपेण वैयाकरणभूषणनामानं ग्रन्थ प्रणिनाय । यथा चोक्तम् -

'फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।

तत्र निर्णीत एवार्थः संक्षपेणेह कथ्यते ॥[25]

भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥

वैयाकरणभूषणे यावन्तो विषयाः सर्वेऽपि पदार्थाः, सिद्धान्ताश्च महताऽऽटोपेन विवेचिताः तत्र व्याख्याने महान् विस्तार: सञ्जातः। तानवगन्तुं बहुकालः, बह्वायास अपेक्षित आसीदिति कृत्वा तेषां सिद्धान्तानां स्वल्पेनायासेन ज्ञानाय तत्रत्यानभिप्रायान् संक्षिप्य वैयाकरणभूषणसारं निर्ममे। वैयाकरणभूषणसारे व्याकरणस्य सर्वेऽप्यार्थिकसिद्धान्ताः विभिन्नेषु प्रकरणेषु समाख्याताः। कौण्डभट्टः वाक्यार्थविषयकाः पदार्थसम्बद्धाः वा ये सिद्धान्ताः नैयायिकैः, मीमांसकैश्च दूषिताः, व्याकरणस्य दार्शनिकसिद्धान्तेषूद्भावितानां दोषाणां निराकरणपूर्वक तेषां सुप्रतिष्ठापनमात्मकर्त्तव्यतया प्रतिजानीते। यथोक्तम् -

दुण्ढि गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्।
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥

वाक्यपदीये भर्तृहरिणा शब्दार्थसम्बन्धे, वृत्तिविषये, अखण्डस्फो टसन्दर्भेऽधिकं युक्तियुतं गम्भीर विस्तृतञ्च विवेचनमकारि। परं तत्रोपवर्णिताः विषया अतीवगभीराः रहस्यमयाश्चासन् अतस्तत्रत्यानां विषयाणां सारल्येन सम्यगर्थावबोधाय हेलाराजप्रभृतिभिः शब्दतत्वविद्भिः वाक्यपदीयस्य टीका निर्मायि । तदानीं व्याकरणसिद्धान्तान् प्रकाशयितुं कश्चन निबन्धग्रन्थो नासीत् येन एकत्रैव सर्वेऽपि सिद्धान्ताः विजानीयुः। अतः कौण्डभट्टेनार्थसिद्धान्तव्युत्पादनाय भट्टोजिदीक्षितोक्तकारिकाव्याख्यानमुखेन वैयाकरणभूषणसारे सरलया गिरा सर्वमुदीरितम्। तत्र पूर्वपक्षोत्तरपक्षक्रमेण वर्णयन् स्वपक्षं यथायथं साधु प्रतिष्ठापितम्।

वैयाकरणसिद्धान्ता भाष्याब्धेः शब्दकौस्तुभे समुद्धृत्य समावेशिता आसन् । अतस्तेषां प्रामाण्यविषये शङ्का नैव समुदियात्। कश्चन वदति यत् एताः कारिकाः भर्तृहरिणा कृताः किन्तु एताः दीक्षितकृताः एव सन्ति यतोहि ग्रन्थकारेण स्वयमेव उक्तम् -

भट्टोजिदीक्षितैः निर्मिताः कारिकाः शुभाः ।
कौण्डभट्टेन व्याख्याताः कारिकास्ताः सविस्तरम् ॥

अत एता एव चतुःसप्तति-सङख्याकाः कारिकाः कौण्डभट्टेन वैयाकरणभूषणसारे विशदीकृताः। अस्य ग्रन्थस्याधिकः प्रचारः प्रसारश्च वर्तते, अल्पाक्षरयुक्तेऽपि सकलार्थसाहकत्वात्। अपेक्षणीयं हि पुरुषाणामवश्यं हि तद् भवेति यत् सकलार्थप्रतिपादकत्वेऽपि सूत्रवल्लाघवयुक्तं भवति। समग्रोऽयं ग्रन्थश्चतुर्दशप्रकरणेषु विभक्तो वर्तते। तानि च प्रकरणानि ग्रन्थे एभिर्नामभिः सन्दर्शितानि सन्ति - (१) धात्वर्थनिर्णयः (२) लकारार्थनिर्णयः (३) सुबर्थनिर्णयः (४) नामार्थनिर्णयः (५) समासशक्तिनिर्णयः (६) शक्तिनिर्णयः (७) नार्थनिर्णयः (८) निपातार्थनिर्णयः (६) त्वादिभावप्रत्ययार्थनिर्णयः (१०) देवताप्रत्ययार्थनिर्णयः (११) अभेदैकत्वसङख्यानिर्णय (१२) सङ्ख्याविवक्षानिर्णयः (१३) क्त्वाद्यर्थनिर्णयः (१४) स्फोटनिर्णयश्चेति।

'सर्व नाम धातुजमाह' इति शाकटायनरीत्या कौण्डभट्ट: शब्दानां धातुयोनित्वमङ्गीकृत्य धातोः प्राधान्यं मनुते। अत एव ग्रन्थादौ सर्वप्रथमं “धात्वर्थ निर्णयः" इति प्रकारणमुपनिबद्धम्। तत्र ‘पचति' इत्यादौ ‘पच् इति धातुः, 'ति' इति प्रत्ययः। कियान् धात्वर्थः, कियाँश्च प्रत्ययार्थ इति निर्णेतुं प्रकरणमेतदारभ्यते। ततः परं 'ति' इति प्रत्ययस्थानिभूतस्य लकारस्यार्थ निर्णेतुं 'लकारार्थनिर्णयः" प्रकरणमुपन्यस्तम्। तिङन्तपदवत् सुबन्तपदेऽपि भागद्वयं विद्यते। एको नामः अपरः सुआदिप्रत्ययरूपः। तत्र को नामार्थः कश्च सुबर्थ इति निर्णयाय क्रमेण सुबर्थनामार्थप्रकरणे उपनिबद्धे। एषु चतुर्यु प्रकरणेषु सुबन्ततिङन्तोभयपदानां व्याख्यानमुपपन्नम्। तदनन्तरं समस्तपदेष्वतिरिक्तां शक्ति संसाध्य शक्ति नार्थनिपातार्थनिर्णयादिकं विवेचयता अन्ते सर्वसिद्धान्तभूतः स्फोटनिर्णयः कृतः । वैयाकरणनये स्फोटादेव जगतः प्रक्रियां विवर्तते। पूर्वं तावद् वाक्यार्थे समुपयुक्तानि अङ्गानि निरूपितानि। अन्ते च अङ्गी स्फोटरूपो निरूपितः। तत्रापि वाक्यस्फोटस्य प्राधान्यं प्रतिपादितम् प्रसङ्गवशात् वर्ण-पद-स्फोटयोः स्वरूपं प्रदर्श्य तयोः काल्प निकत्वं च कौण्डभट्टो निरूपितवान्।

अनया रीत्या कस्मिन्नपि पदे का प्रकृतिः, कः प्रत्ययः, कः प्रकृत्यर्थः, कश्च प्रत्ययार्थः, कीदृशश्च तयोरन्वयः वाक्यार्थे कस्यार्थस्य प्राधान्यं, कस्याप्राधान्यम् कीदृशश्च शाब्दबोध इत्यादिकं सर्वं सुबन्ततिङन्तादिपदादौ विवेचितम्। अन्ते च सकलप्रपञ्चकारणीभूतं स्फोटं तद्भेदाँश्च साधु प्रत्यपादयत्। वैयाकरणभूषणसारे विवेचिता एते एव विषया नागेशभट्टेन वैयाकरणसिद्धान्तमञ्जूषायां, लघुमञ्जूषायां, परमलघुमञ्जूषायाञ्च यथायथं व्याख्याताः। कौण्डभट्टकृतवैयाकरणभूषणसारस्य वैशिष्ट्यमद्यापि पूर्ववदवतिष्ठते। अत एवायं ग्रन्थो विभिन्नेषु विश्वविद्यालयेषु पाठ्यक्रमे निर्धारितो विद्यते। प्रायः सर्वत्र व्याकरणदर्शनग्रन्थाध्ययनाऽध्यापने वैयाकरणभूषणसारस्यैव प्राधान्यमवलोक्यते। व्याकरणशास्त्रे वैयाकरण भूषणसारग्रन्थस्यातीव महत्त्वमस्तीति नातिरोहितम्। ग्रन्थोऽयं धात्वर्थादि विचारपरकः। यद्यपि धात्वर्थादिविचारोऽन्यमतनिरसनपुरस्सरं सम्यक्तया विहितोऽन्याचार्यैरिति। परं कौण्डभट्टेन यादृग् विचारो भूषणसारे कृतः न तादृ ग्दृश्यते अन्यत्र महाभाष्यसागरोद्धट्टोजिदीक्षित - कृतशब्दकौस्तुभनिर्णीतार्थ प्रकाशकत्वात्।

**सन्दर्भ ग्रन्था**


1. काव्यादर्श कारिका - १/३४
2. वाक्यपदीयम् ब्रह्मकाण्डम्-कारिका - ०१
3. वाक्यपदीयम् ब्रह्मकाण्डम्-कारिका - १३
4. महाभाष्ये उद्योतटीकायाम् कारिका
5. वाक्यपदीयम् ब्रह्मकाण्डम्-कारिका २३
6. महाभारत शान्तिपर्व-कारिका
7. मनुस्मृति १-२१
8. पाणिनिशिक्षायाम् कारिका – ४१
9. पाणिनिशिक्षायाम् कारिका – ४२
10. पदमञ्जर्याम-कारिका
11. वाक्यपदीयम् ब्रह्मकाण्डम्
12. वाक्यपदीयम् ब्रह्मकाण्डम् - ४१
13. महाभाष्यम् पस्पस्शाहिक
14. वाक्यपदीयम् – कारिका –१२ (ब्रह्मकाण्डम)
15. वाक्यपदीयम्-कारिका-१४ (ब्रह्मकाण्डम्)
16. वाक्यपदीयम् – कारिका –१६ (ब्रह्मकाण्डम)
17. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका – १७
18. रामायणे कारिका
19. महाभाष्ये पस्पशाहिक
20. महाभारते शान्तिपर्व
21. वाक्यपदीयम् ब्रह्मकाण्डम् - ०१
22. शब्दशक्तिप्रकाशिका भूमिका - ०१
23. शब्दशक्तिप्रकाशिका भूमिका - ०२
24. वैयाकरणभूषणसारे
25. वैयाकरणभूषणसारः मङ्गलाचरण कारिका - 1